http://www.rtuonline.com

# संस्कृत (संस्कृतम्)

## प्रथम प्रश्न पत्र – (प्रथम प्रश्न पत्रम्)

## (नाटक, प्राचीन काव्य, कथा साहित्य एवं अलंकार)

समयावधि : घण्टात्रयम् पूर्णाङ्का : 100

**परीक्षाविधिः समेयां प्रश्नानामुत्तराणि स्वसंस्कृतगिरा देयानि।**

**व्याकरणभगतः अनिवार्योनोत्तरेण भाव्यम्।**

1. अधोलिखितेषु श्लोकषु कयोः द्वयोः श्लोकयोः सप्रसंगं व्याख्या कार्या–

(क) कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै–
 र्नहि काषायं वृत्तिहेतोः प्रसन्नः।
धीरा कन्येयं दृष्टधर्मप्रचारा
 शक्ता चारित्रं रक्षितुं मे भगिन्याः।।

(ख) ऋज्वायतां हि मुखतोरणलोलमानां
 भ्रष्टां क्षितौत्वमगच्छसि। सर्पम्।
मन्दानिलेन निशि या परिवर्तमाना
 किञ्चित् करोति भुजगस्य विचेष्टितानि।।

http://www.rtuonline.com

ma9300930012@gmail.com

Whatsapp @ 9300930012
Your old paper & get 10/-
पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से

PTO

http://www.rtuonline.com

http://www.rtuonline.com

http://www.rtuonline.com

(ग) श्रोणी समुद्वहन पार्श्वनिपीडितानि
खेदस्तनान्तरसुखान्युपगूहितानि।
उद्दिश्य मां च विरहे परि देवितानि
वाद्यान्तरेषु कथितानि च सस्मितानि।।

(घ) प्रच्छाद्य राजमहिषीं नृपते हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशंङ्कितं मे।।

२. अधोलिखितानां श्लोकानां कयो: द्वयो: श्लोकयो: संप्रसंगं अनुवाद: विधेय: -

(क) पूर्वं त्वयाप्यभिमतं गतमेवमासी
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तु:।
कालक्रमेण जगत: परिवर्तमाना
चक्रारपंक्तिरिव गच्छति भाग्यपंक्ति:।

(ख) अनाहारे तुल्य: सततरुदि तक्षामवदन:
शरीरे संस्कारं नृपतिसमदु:खं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपति:
नृप: प्राणान् सद्यस्त्यजति यदि तस्याप्युपरम:।

(ग) कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्टवा सवैरमवन्तिराजतनयां पञ्चेषव: पातिता:
तैरद्यापि सशल्यमेव हृदय भूयश्च विद्धा वयं
पञ्चेषुर्मदनों यथा कथमयं पष्ठ: शर: पातित:।

(घ) भिन्नास्ते रिपवो भवद्गुणरता: पौरा: समाश्वासिता:
पार्ष्णी यपि भत्प्रयाणसमये तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव।।

३. निम्न प्रश्नेषु केषाञ्चित् पञ्चानां प्रश्नानां संस्कृतभाषायां उत्तराणि देयानि-

(i) वत्तदेशस्य राजा क: आसीत्?
(ii) स्वप्रवासवदत्तम् नाटकस्य विदूषक: क: आसीत्?
(iii) धात्री का आसीत्?
(iv) मगधराजपुत्री का अस्ति?
(v) कस्या: घोषवती प्रिया?
(vi) कस्य स्वभाव: कातर: भवति?
(vii) लोके के दुर्लभा: ?

४. अधोलिखतश्लोकेषु द्वयो: श्लोकयो: सप्रसंग व्याख्या करणीया -

(क) सर्वदाभिगत: सद्भि: समुद्र इव सिन्धुभि:।
आर्य: सर्व समश्चैव सदैव प्रियदर्शन:।।

(ख) विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शन:।
कालाग्निसदृश: क्रोधे क्षमया पृथिवीसम:।

(ग) न विरोधो बलबता क्षमो रावण तेन ते।

http://www.rtuonline.com

http://www.rtuonline.com

अनादृत्य तु तद्वाक्यं रावणः कालचोदितः।

(घ) स च सर्वान् समानीय वानरान् वानरर्षभः।
दिशः प्रसीपयामास दिदृक्षुर्जनकात्मजाम्।।

५. पञ्चलघूत्तरात्मकानां प्रश्नानां उत्तराणि संस्कृतभाषायां देयानि-

(क) जीवालोकस्य धर्मस्य च केन रक्षिता?

(ख) कौसल्यानन्दवर्धनः कोऽस्ति?

(ग) सीता कस्य कुले जाता?

(घ) सीता रामं कथं अनुगता?

(ङ) निषादराजस्य किं नाम आसीत्?

(च) भरतः कस्मै नैच्छद्?

(छ) शूर्पणखायाः भ्रातरः के आसन्?

(ज) रामः सुग्रीमवसहितो कुत्र गत्वा कं क्षोभयामास?

६. सप्रसंगम् अनुवादः करणीय -

(क) अस्ति गोदावरी विशालः शाल्मली तरुः। तत्र नानादिग्देशादा-गत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचित् अवसन्नायां रात्रौ अस्ताचलचूड़ावलम्बिनि भगवति कुमुदिनी नायके चन्द्रमसि, लघुपतनक नामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत्। तमालोक्याचिन्तयत् अद्य प्रातरेवानिष्टदर्शं जातम्।

अथवा

एतच्छुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति, तत्र चित्रग्रीव उवाच-मित्र। मा मैवं कुरु, प्रथममस्मदा-श्रितानोमेतेषां तावत्पाशंश्छिन्धि, तदा मम पाशांश्छेत्स्यति, हिण्यकोऽयाहअहमल्पशक्तिः, दन्ताश्च में कोमलाः। तदेतेषां पाशांश्छेत्तुं कथं समर्थः भवामि। तद् यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशान् छेत्स्यामि तदनन्तरमेतेषामपि बन्धनं यावच्छक्यं छेत्स्यामि।

(ख) व्योमैकान्तविहारिणीऽपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि।
दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि।।

अथवा

वरं मौनं कार्यं न च वचन मुक्तं यद नृतम्
वरं क्लैब्यं पुसां न च परकलत्राभिगमनम्।
वरं प्राणत्यागो न च पिशुनवाक्ये स्वभिरुचि-
वरं भिक्षाशित्वं न च परधनास्वादनसुखम्।।

७. अधोलिखितेषु अलंकारेषु अलंकार द्वयस्य लक्षणं उदाहरणं लक्षणसगतिकरणं च करणीयम् -

(क) यमक (ख) उत्प्रेक्षा (ग) निदर्शना (घ) अतिश्योक्ति

http://www.rtuonline.com